तत्त्वाचार्यः

सूचना- प्रश्नपत्रेऽस्मिन् 50 प्रश्नाः सन्ति। प्रत्येकं प्रश्नस्य एकः अङ्कः। विकल्पेभ्यः उचितविकल्पं चित्वा तत्समक्षं केवलमेकं विकल्पसंकेतं लिखन्तु। पुनर्शोधिताः विकल्पाः न गणयिष्यन्ते।

1. सांख्यदर्शने 'असदकरणात्' इति कारिकया स्वीक्रियते –

(अ) सत्कार्यवादः (ब) असत्कार्यवादः (स) विवर्तवादः (द) अणुवादः

2. न्यायदर्शनानुसारम् ईश्वरः अस्ति -

(अ) जगतः उपादानकारणम् (ब) जगतः निमित्तकारणम् (स) जगतः निमित्तोपादानकारणम् (द) न किमपि कारणम्

3. अध्यासभाष्यं केन लिखितम् ?

(अ) वल्लभाचार्येण (ब) मध्वाचार्येण (स) रामानुजाचार्येण (द) शङ्कराचार्येण

4. वैशेषिकदर्शनानुसारं पदार्थाः सन्ति –

(अ) चत्वारः (ब) पञ्च (स) सप्त (द) नव

5. पञ्चपादिका टीका केन लिखिता -

(अ) शङ्कराचार्येण (ब) पद्मपादाचार्येण (स) वाचस्पतिमिश्रेण (द) श्रीहर्षेण

6. 'खण्डनखण्डखाद्यम्' इति वेदान्तग्रन्थस्य प्रणेता अस्ति –

(अ) श्रीहर्षः (ब) भारविः (स) मधुसूदनसरस्वती (द) अप्पयदीक्षितः

7. पूर्वमीमांसादर्शनस्य सूत्रकारः अस्ति –

(अ) बादरायणः (ब) जैमिनिः (स) कणादः (द) गौतमः

8. साङ्ख्यदर्शनानुसारं पुरुषः अस्ति –

(अ) अचेतनः (ब) जडः (स) चेतनः (द) विकृतिः

9. प्रभासखण्डः कस्मिन् पुराणे आगच्छति-

(अ) अग्निपुराणे (ब) ब्रह्मपुराणे (स) कूर्मपुराणे (द) स्कन्दपुराणे

10. सर्वाः विद्याः कस्मिन् पुराणे निगूहिताः-

(अ) वामनपुराणे (ब) विष्णुपुराणे (स) अग्निपुराणे (द) ब्रह्माण्डपुराणे

11. सत्यनारायणव्रतकथा कस्मिन् पुराणे अस्ति-

(अ) पद्मपुराणे (ब) स्कन्दपुराणे (स) विष्णुपुराणे (द) वराहपुराणे

12. कतिभिः पुराणैः शिवो गीयते-

(अ) दशभिः (ब) चतुर्भिः (स) द्वाभ्याम् (द) सप्तभिः

13. पर्वन्-शब्दस्य षष्ठ्येकवचने किं रूपम्-

(अ) पर्वस्य (ब) पर्वणः (स) पर्वेः (द) पर्वणोः

14. रामायणे केवटस्य प्रसङ्गः कस्मिन् काण्डे आगच्छति-

(अ) अयोध्याकाण्डे (ब) अरण्यकाण्डे (स) लङ्काकाण्डे (द) किष्किन्धाकाण्डे

15. महाभारतस्य मुख्यः रसः कः-

(अ) वीरः (ब) रौद्रः (स) शान्तः (द) करुणः

16. परीक्षित-पुत्रस्य नाम किम्-

(अ) वज्रभानुः (ब) सुबाहुः (स) जनमेजयः (द) युयुत्सुः

17. अभिज्ञानशाकुन्तलस्य विदूषकस्य नाम किम्-

(अ) माढव्यः (ब) गौतमः (स) वसन्तकः (द) मञ्जिरकः

18. वासवदत्ता-काव्यस्य नायकः कः-

(अ) कन्दर्पकेतुः (ब) भासः (स) उदयनः (द) सुबन्धुः

19. नैषधीयचरिते कति सर्गाः सन्ति-

(अ) 19 (ब) 18 (स) 22 (द) 21

20. काव्यप्रकाशस्य टीका का-

(अ) अभिनवभारती (ब) बालबोधिनी (स) कामधेनुः (द) अपलोकटीका

21. बुद्धचरितस्य रचयिता कः-

(अ) बुद्धः (ब) बाणः (स) विश्वेश्वरः पाण्डेयः (द) अश्वघोषः

22. अधोलिखितेषु भासस्य रूपकं किम्-

(अ) अविमारकम् (ब) दूतवाक्यम् (स) पञ्चरात्रम् (द) महावीरचरितम्

23. वक्रोक्तिसम्प्रदायस्य प्रवर्तकः आचार्यः कः-

(अ) क्षेमेन्द्रः (ब) कुन्तकः (स) वामनः (द) भामहः

24. चम्पूरामायणस्य कविः कः-

(अ) वाल्मीकिः (ब) तुलसीदासः (स) भोजः (द) भासः

25. **'रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय'** सूक्तिरियं कस्मिन् ग्रन्थे वर्तते-

(अ) कुमारसम्भवे (ब) रघुवंशे (स) मालविकाग्नमित्रे (द) मेघदूते

26. स्पर्श-वर्णाः कति सन्ति-

(अ) 10 (ब) 15 (स) 20 (द) 25

27. आभ्यन्तर-प्रयत्नाः कति सन्ति-

(अ) 2 (ब) 3 (स) 4 (द) 5

28. कति कारकाणि सन्ति-

(अ) 2 (ब) 4 (स) 6 (द) 8

29. अधोलिखितेषु किं कारकं नास्ति-

(अ) करणम् (ब) सम्प्रदानम् (स) सम्बन्धः (द) अधिकरणम्

30. 'त्रिमुनि व्याकरणम्' इत्यत्र **'त्रिमुनि'** शब्दे कः समासः -

(अ) अव्ययीभावसमासः (ब) बहुव्रीहिसमासः (स) द्वन्द्वसमासः (द) द्विगुसमासः

31. आन्तर्यं कतिविधं भवति-

(अ) द्विविधम् (ब) त्रिविधम् (स) चतुर्विधम् (द) पञ्चविधम्

32. आन्तर्येषु किम् आन्तर्यं बलवद् भवति-

(अ) अर्थकृतम् (ब) स्थानकृतम् (स) गुणकृतम् (द) प्रमाणकृतम्

33. कृत्य-प्रत्ययाः कति सन्ति-

(अ) 3 (ब) 5 (स) 7 (द) 9

34. कृत्-प्रत्ययः कस्मिन् अर्थे भवति-

(अ) कर्तरि (ब) कर्मणि (स) भावे (द) एषु न कस्मिंश्चित्

35. वेदाः कति सन्ति -

(अ) त्रयः (ब) चत्वारः (स) पञ्च (द) अनेके

36. "जातवेदः" इति शब्दस्य अर्थः कः -

(अ) अग्निः (ब) स्वर्गकामः (स) इन्द्रः (द) विष्णुः

37. शिवसंकल्पसूक्तस्य सम्बन्धः केन वेदेन सह वर्तते -

(अ) ऋग्वेदेन (ब) यजुर्वेदेन (स) सामवेदेन (द) अथर्ववेदेन

38 कर्मप्रधानो वेदो वर्तते -

(अ) ऋग्वेदः (ब) यजुर्वेदः (स) सामवेदः (द) अथर्ववेदः

39. काण्वशतपथब्राह्मणस्य सम्बन्धः केन वेदेन सह वर्तते -

(अ) ऋग्वेदेन (ब) यजुर्वेदेन (स) सामवेदेन (द) अथर्ववेदेन

40. 'सर्पवेदः' कस्योपवेदः वर्तते ?

(अ) ऋग्वेदस्य (ब) यजुर्वेदस्य (स) सामवेदस्य (द) अथर्ववेदस्य

41. मन्त्रब्राह्मणस्य सम्बन्धः केन वेदेन सह वर्तते ?

(अ) ऋग्वेदेन (ब) यजुर्वेदेन (स) सामवेदेन (द) अथर्ववेदेन

42. ज्ञानकर्मोपासनानां समन्वयः कुत्र समुपलभ्यते ?

(अ) कठोपनिषदि (ब) प्रश्नोपनिषदि (स) ईशोपनिषदि (द) छान्दोग्योपनिषदि

43. ज्योतिषशास्त्रस्य कति प्रवर्तकाः सन्ति-

(अ) 18 (ब) 20 (स) 13 (द) 25

44. लीलावती इत्यस्य रचनाकारो विद्यते-

(अ) वराहमिहिरः (ब) पृथुयशः (स) भास्कराचार्यः (द) लल्लः

45. नन्दातिथिरस्ति-

(अ) द्वितीया (ब) प्रतिपद् (स) चतुर्थी (द) पूर्णिमा

46. चतुर्थीतिथेः स्वामी अस्ति-

(अ) दुर्गा (ब) कुबेरः (स) गणेशः (द) विष्णुः

47. स्वरशास्त्रे कति स्वराः पठिताः सन्ति-

(अ) 5 (ब) 6 (स) 7 (द) 10

48. अहोरात्रे कति घटयः भवन्ति-

(अ) 24 (ब) 60 (स) 30 (द) 50

49. ध्रुवसंज्ञकनक्षत्रम् अस्ति-

(अ) कृतिका (ब) रोहिणी (स) मघा (द) स्वाती

50. चन्द्रस्य मूलत्रिकोणराशिरस्ति-

(अ) वृषः (ब) कर्कः (स) सिंहः (द) कन्या